# মঙ্গলকবচম্

{॥ মঙ্গলকবচম্ ॥}

শ্রীগণেশায নমঃ ।

অস্য শ্রীঅঙ্গারককবচস্তোত্রমন্ত্রস্য কশ্যপ ঋষিঃ,

অনুষ্টুপ্ ছন্দঃ, অঙ্গারকো দেবতা, ভৌমপ্রীত্যর্থং জপে বিনিযোগঃ ।

রক্তাম্বরো রক্তবপুঃ কিরীটী চতুর্ভুজো মেষগমো গদাভৃত্ ।

ধরাসুতঃ শক্তিধরশ্চ শূলী সদা মম স্যাদ্বরদঃ প্রশান্তঃ ॥ ১॥

অঙ্গারকঃ শিরো রক্ষেন্মুখং বৈ ধরণীসুতঃ ।

শ্রবৌ রক্তাম্বরঃ পাতু নেত্রে মে রক্তলোচনঃ ॥ ২॥

নাসাং শক্তিধরঃ পাতু মুখং মে রক্তলোচনঃ ।

ভুজৌ মে রক্তমালী চ হস্তৌ শক্তিধরস্তথা ॥ ৩॥

বক্ষঃ পাতু বরাঙ্গশ্চ হৃদযং পাতু রোহিতঃ ।

কটিং মে গ্রহরাজশ্চ মুখং চৈব ধরাসুতঃ ॥ ৪॥

জানুজঙ্ঘে কুজঃ পাতু পাদৌ ভক্তপ্রিযঃ সদা ।

সর্বাণ্যন্যানি চাঙ্গানি রক্ষেন্মে মেষবাহনঃ ॥ ৫॥

য ইদং কবচং দিব্যং সর্বশত্রুনিবারণম্ ।

ভূতপ্রেতপিশাচানাং নাশনং সর্বসিদ্ধিদম্ ॥ ৬॥

সর্বরোগহরং চৈব সর্বসম্পৎপ্রদং শুভম্ ।

ভুক্তিমুক্তিপ্রদং নৃণাং সর্বসৌভাগ্যবর্ধনম্ ।

রোগবন্ধবিমোক্ষং চ সত্যমেতন্ন সংশযঃ ॥ ৭॥

॥ ইতি শ্রীমার্কণ্ডেযপুরাণে মঙ্গলকবচং সম্পূর্ণম্ ॥

Encoded and Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Mangala Kavacham Lyrics in Bengali PDF
% File name : mangalakavach.itx
% Category : kavacha
% Location : doc_z_misc_navagraha
% Author : Traditional
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : Ravin Bhalekar ravibhalekar at hotmail.com)
% Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com
% Description-comments : mArkaNDeyapurANa
% Latest update : February 22, 2005
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.

%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 13, 2015 ] at Stotram Website